पार्थिवलिंगपूजाविधिः

११ पत्र

नं० ११३४५

पार्थिव लिङ्ग पूजन विधि

८ पत्रानि

धर्मार्थ लि०

ॐ श्रीगणेशाय नमः ॐ अथ कालाग्निरुद्रोपनिषद्वि
रु॰ १ पिना सर्वांगं भस्मनोद्धूल्य प्रत्यंगं रुद्राक्षान्धृत्वा स
दाशिवं मनसा स्मरन् उदीचीं गत्वा भूमिं प्रोक्ष्य भूमि
भूम्ना द्यौर्वरिम्णान्तरिक्षं महित्वा उपस्थे ते देव्यदिते
ग्निमन्नादमन्नाद्यायादधे इति मंत्रेण स्रुचो देशाव
ष्टांगुलिमृत्तिकां गृहीत्वा तां केन केवालुकादिरहि
तां कृत्तिकां संस्थाप्य ये यज्ञामित्यातीय ये पथां पथि
रक्षय ऐलबृदायव्युधः ये तीर्थानि प्रचरंति सृकावं
तो निषंगिणः नमो रुद्रेभ्य इति संस्थाप्य नमो रुद्रा। राम॰ १

भ्योयेपृथिव्यांयेंतरिक्षेयेदिवियेषामन्नंवातोवर्षमि
षवस्तेभ्योदशप्राचीर्दशदक्षिणादशप्रतीचीर्दशो
दीचीर्दशोर्ध्वास्तेभ्योनमस्तेनोमृडयंतुतेयंद्विष्मोय
श्चनोद्वेष्टितंवोजंभेदधामि मानस्तोकइतिजलेसं
प्रेक्ष्य मानस्तोकेतनयेमानआयुषिमानोगोषुमानो
अश्वेषुरीरिषःवीरान्मानोरुद्रभामितोवधीर्हविष्म
तोनमसाविधेमतेलघुन्यासपूर्वकरुद्रंरुद्रसूक्तंप्रका
रेणघटोक्तंलिंगंसंस्थाप्यप्राणप्रतिष्ठांकृत्वा ॐअ
स्यश्रीप्राणप्रतिष्ठामहामंत्रस्यब्रह्माविष्णुमहेश्वर

पू॰ २
2

ऋषयः ऋग्यजुःसामाथर्वाणि छंदांसि चैतन्यरूपिणी
प्राणशक्तिर्देवता आं बीजं ह्रीं शक्तिः क्रों कीलकं श्री
पार्थिवेश्वर प्राणप्रतिष्ठापने विनियोगः आं अंगु
ष्ठाभ्यां नमः ह्रीं तर्जनीभ्यां नमः क्रों मध्यमाभ्यां नमः
आं अनामिकाभ्यां नमः ह्रीं कनिष्ठिकाभ्यां नमः ॥
क्रों करतलकरपृष्ठाभ्यां नमः एवं हृदयादिन्यासः
भूर्भुवः स्वरोमिति दिग्बंधः अथ ध्यानम् ॐ रक्तांभोधि
स्थपोतोल्लसदरुणसरोजाधिरूढा कराब्जैः पाशं
कोदंडमिक्षूद्भवमणिगणमप्यंकुशं पंचबाणा

रा॰ २

णान्विभ्राणां स्वकपालं त्रिनयनलसितापीनवक्षो
रुहाढ्या देवी बालार्कवर्णा भवतु सुखकरी प्राणश
क्तिपरानः श्रां ह्रीं क्रों यं रं लं वं शं षं सं हं क्षं लं हंसः
सोहंसीना — प्राणा इह प्राणाः श्रां ह्रीं क्रों यं रं लं वं शं
षं सं हं क्षं लं हंसः सोहं सीजीव इह स्थिताः श्रां ह्रीं क्रों
यं पुनस्त्वदृक्षत् सर्वेंद्रियाणि वाङ्मनश्चक्षुः श्रोत्रजि
ह्वाघ्राणवाक्पाणिपाद पायूपस्था इहैवागत्य सुखं
चिरं तिष्ठंतु स्वाहा अमृतं वै प्राणाः अमृतमापः।

प्राणानिवयष्णास्थानमपह्नूयते जन्मादि पंचदशासं
पू० ख्याकार्थं पंचदशप्राणवाहती ततोवामभागेकलशं
३ संस्थाप्य आपोवाइदंहं सर्वविश्वाभूतान्यापःप्राण
3 वआपःपशवआपोऽन्नमापोऽमृतमापःसंम्राडापोवि
राडापःस्वराडापश्छंदांस्यापोज्योतींष्यापोयजूंष्या
पःसत्यमापःसर्वादेवताःआपोभूर्भुवःस्वरापओंत
त्पुरुषायविद्महेमहादेवायधीमहितन्नोरुद्रःप्र
चोदयात् इतिमंत्रेणकलशमपिमंत्रपूजाकृत्वा राम० ३

णोक्तगणपतिं पूजयित्वा अतः परीरन्यासं कुर्या
त् ललाटे शिवाय नमः कंठे रुद्राय नमः नाभौ ईशाना
य नमः जानौ शंकराय नमः पादयोः सर्वव्यापिने नमः
अथ ध्यानं मंगलायतनं देवं भस्मशिवतासमन्वितं ।
ध्यायेत्कल्पतरोर्मूले लक्ष्मीवासीनं जगद्गुरुं १ ध्या
येन्नित्यं महेशं रजतगिरिनिभं चारुचंद्रावतंसं रत्ना
कल्पोज्वलांगं परशुमृगवराभीतिहस्तं प्रसन्नं पद्मा
सीनं समंतात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं विश्वा
द्यं विश्ववंद्यं निखिलभयहरं पंचवक्त्रं त्रिनेत्रम् २

ॐ नमो भगवते उमादेव्यै शंकरप्रियायै नमः इति लिंग
पू॰ ४ स्योपरि अक्षितान्निक्षिप्य ॐ नमस्ताराघेत्यासनं ॐ
नमः शंभवे मयोभवे चेति पाद्यं ॐ नमः शंकराय च मय
स्कराय चेत्यर्घ्यं ॐ नमः शिवाय च शिवतराय चेत्याच
मनीयं नमस्तीर्थ्याय च कूल्याय च नमः पार्याय चावा
र्याय च नमः प्रतरणाय चोत्तरणाय च नमः आतार्या
य चालाद्याय चेति स्नानं अथ पंचामृतस्नानं शुद्धो
दकस्नानं आपातालनभःस्थलांतभुवनब्रह्मांड
माविस्फुरज्ज्योतिः स्फाटिकलिंगमौलिविलस राम॰ ४

स्रूर्णोऽवंतामन्तं अस्तोकास्तुतमेकमीशमनिशं रुद्रा
न्नवाकारमपेक्ष्याप्येष्टो सिततमिद्धयेन्दु वपदं विश्रोभिषि
चेद्धिं वंऽनरतम्बुडीरवताय नमः निर्माल्यं विसृज्य।
नमो हिरण्यबाहवे इति स्नकल्पयित्वा स्नात्वा तद्रु
द्रोदके स्नर्पयेत मानस्तोके तनये मा न आयुषि मा।
नो गोषु मा नो अश्वेषु रीरिषः वस्त्रं नमो ह्रस्वाय च वस्त
रुद्रनेचेति यज्ञोपवीतं नमो हिरण्यबाहवे सेनान्ये
दिशां च पतये नमः इत्याभरणानि नमः पुष्प्य इति
गंधं नमः सोमाय च रुद्राय च नमस्ताम्राय चारुणा

पू॰ ५

5

यचनमःशंगायचपशुपतयेचेत्यक्षतान् नमस्तारायेति
पुष्पं नमोबिल्मिनेचकवचिनेचनमःश्रुतायचश्रुत
सेनायचेतिबिल्वपत्रं नमःकपर्दिन इतिधूपं नमोगो
ष्ठ्यायचगृह्यायचेतिदीपंनमोबभ्लुशायविव्याधि
नेन्नानांपतयेनमः इतिनैवेद्यं नमःपर्णायचपर्णशा
दायचेतिताम्बूलं हिरण्यगर्भःसमवर्त्तताग्रेभूतस्य
जातःपतिरेकआसीत् सदाधारपृथिवींद्यामुतेमां
कस्मैदेवायहविषाविधेम इतिदक्षिणां तेजोसि
तेजोमेयच्छ इतिनीराजनं सद्योजातंप्रपद्यामिसद्यो

राम॰ ५

जाताय वै नमो नमः इति मंत्रषट्कं लिंगस्योपरि ईशाना
दिक्रमेण अष्टौ पुष्पांजलीन् दत्वा भवाय जलमूर्त्तये
नमः रुद्राय तेजोमूर्त्तये नमः पशुपतये जयमूर्त्ते
ये नमः उग्राय वायुमूर्त्तये नमः महादेवाय सोममूर्त्त
ये नमः भीमाय आकाशमूर्त्तये नमः ईशानाय सूर्यात्मा
मूर्त्तये नमः त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्द्धनं उ
र्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात् इति द्वि
तीयमंत्रषट्कं पठेत् ततः रुद्रभागास्तं जपस्ततेनायसेनरो

मृत्युवर्ततत्पन्वापिनाकहस्ताः कृत्तिवासाः इतिप्रदक्षि
पू: णनमस्कारान् ततः पंचावृत्तिमंत्रंजप्त्वाततस्तर्पयेत्
६ शिवंस्तर्पयामि भवंतं० हरंतर्पयामि० मृडंतं० शशि
6 शेखरंतं० वामदेवं० विरूपाक्षंतं० विश्वरूपंतं० कप
र्दिनंतं० नीललोहितंतं० श्रीकंठं त्रियबकंतर्पयामि
गछगछसुरश्रेष्ठस्वस्थानंपरमेश्वर ममदेहस्यर
क्षार्थंपुनरागमनायच आवाहनंनजानामिनजाना
मिविसर्जनं पूजांचैवनजानामिक्षमस्वपरमेश्वर राम: ६

ॐ अस्य श्री शिवपंचाक्षरीमहामंत्रस्य ब्रह्माऋषिः
अनुष्टुप् छंदः श्री सांबसदाशिवो देवता ॐ बीजं नमः
शक्तिः शिवायेति कीलकं मम चतुर्विधपुरुषार्थे ज
पे विनियोगः ब्रह्मऋषये नमः शिरसि अनुष्टुप् छं
दसे नमः मुखे श्री सांबसदाशिवदेवतायै नमः हृ
दि ॐ बीजाय नमः गुह्ये नमः शक्तये नमः पादयोः शि
वायेति कीलकाय नमः नाभौ ॐ अंगुष्ठाभ्यां नमः नंत
र्जनीभ्यां नमः मंमध्यमाभ्यां नमः शिं अनामिकाभ्यां नमः

मृ: १७

वांकनिष्ठिकाभ्यांनमः यंकरतलकरपृष्ठाभ्यांनमः ॐ
हृदयायनमः नंशिरसेस्वाहा मंशिखायैवषट् शिंक
वचायहुं वांनेत्रत्रयायवौषट् यंअस्त्रायफट् भूर्भुवः
स्वरोमितिदिग्बंधः अथध्यानं शांतंपद्मासनस्थंश
शिधरमुकुटंपंचवक्त्रंत्रिनेत्रं शूलंवज्रंचखड्गंपर
शुमभयदं दक्षभागेवहंतं नागंपाशंचघंटांप्रलय
हुतवहंपार्वतीवामभागे नानालंकारयुक्तंस्फटि
कमणिनिभंपार्वतीशंनमामि इतिध्यानं अथपंचमु

राम:

जा लं पृथिव्यात्मने गंधं हं आकाशात्मने पुष्पं यं वा
य्वात्मने धूपं रं वह्न्यात्मने दीपं वं अमृतात्मने नैवे
द्यं शं सर्वात्मने तांबूलं अथ मालाध्यानं माले माले
महामाले सर्वतत्त्वस्वरूपिणि चतुर्वर्गस्त्वयि न्यस्त
स्तस्मान्मे सिद्धिदा भव तदनंतरं जपं कुर्यात् ततः उ
त्तरन्यासं कृत्वा गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं
जपं सिद्धिर्भवतु मे देव त्वत्प्रसादान्महेश्वर इति
भूमौ जले निक्षिपेत् ततो मालाया उत्तरध्यानं त्वं

पू॰ ८

मात्मेसर्वदेवानांप्रीतिदाशुभदाभव शिवंकुरुष्वम
द्रेमेयशोवीर्यंचसर्वदा १ यदक्षरपदभ्रष्टंमात्रा
हीनंचयद्भवेत् तत्सर्वंक्षम्यतांदेवरक्षस्वपरमेश्व
र शुभमस्तु ॥
यकारंगणात् विनायके चार्पितोपितमया स्थूल
पाशोह्रिस्वामिकार्तिकभुजंगवामेशिवस्यपूजा
सफलाभवंतु ॥

राम॰ ८